ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः

ह॒रि॒ः ओं ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

# पद पाठः (वाक्य सहित)

# प्रथमकाण्डे सप्तमः प्रश्नः

## Version Notes:

**This is now the current Version 1.0 dated October 31, 2021.**

1. This replaces the earlier version 1.0 dated June 30, 2021.

2. We have listened to the Pada Parayanam telecast by TTD channel. The corrections found have been updated . The corrections found and reported till October 15, 2021 are also updated.

3. Required convention, style and presentation improvements or standardisations has been done whereever applicable.

4. Notify your corrections / suggestions etc to our email id vedavms@gmail.com

## Previous Versions

| | | |
|---|---|---|
| 1st | Version Number | 0.0 dated 31st May 2019 |
| 2nd | Version Number | 0.1 dated 31st March 2020 |
| 3rd | Version Number | 0.2 dated 30th June 2020 |
| 4th | Version Number | 0.3 dated 31st Aug 2020 |
| 5th | Version Number | 1.0 dated 30th June 2021 |

# Contents

1 कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

पद पाठे प्रथमं काण्डं ........................................5

1.7 प्रथमकाण्डे सप्तमः प्रश्नः – याजमान–ब्राह्मणं .......5

ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः ॥ हरिः ओं

# 1 कृष्ण यजुर्वेदीय तैत्तिरीय संहिता पद पाठे प्रथमं काण्डं

## 1.7 प्रथमकाण्डे सप्तमः प्रश्नः – याजमानब्राह्मणं

**TS 1.7.1.1**

पाकयज्ञं ँवा अन्वाहिताग्नेः पशव उप तिष्ठन्त इडा खलु वै

पाकयज्ञः सैषा ऽन्तरा प्रयाजानूयाजान्. यजमानस्य लोके ऽवहिता

तामाह्रियमाणामभि मन्त्रयेत सुरूपवर्.षवर्ण एहीति पशवो वा इडा

पशूनेवोप ह्वयते यज्ञं ँवै देवा अदुह्रन्. यज्ञो ऽसुरा७ँ अदुहत् ते ऽसुरा

यज्ञदुग्धाः परा ऽभवन्. यो वै यज्ञस्य दोहं ँविद्वान्. – [ ] **1**

**TS 1.7.1.1 (Padam)**

पाकयज्ञमिति पाक – यज्ञम् । वै । अन्विति ।

आहिताग्नेरित्याहित – अग्नेः । पशवः । उपेति । तिष्ठन्ते । इडा ।

खलु । वै । पाकयज्ञ इति पाक – यज्ञः । सा । एषा । अन्तरा ।

प्रयाजानूयाजानिति प्रयाज – अनूयाजान् । यजमानस्य ।

लोके । अवहितेयव – हिता । ताम् ।

आह्रियमाणामित्या – ह्रियमाणाम् । अभीति । मन्त्रयेत ।

सुरूपवर्.षवर्ण इति सुरूप –वर्.षवर्णे । एति । इहि । इति ।

पशवः । वै । इडा । पशून् । एव । उपेति । ह्वयते । यज्ञम् ।

वै । देवाः । अदुह्रन्न् । यज्ञः । असुरान् । अदुहत् । ते । असुराः ।

यज्ञदुग्धा इति यज्ञ – दुग्धाः । परेति । अभवन्न् । यः । वै ।

यज्ञस्य । दोहम् । विद्वान् । **1 (50)**

**TS 1.7.1.2**

यजते ऽप्यन्यं ँयजमानं दुहे सा मे सत्या ऽऽशीरस्य यज्ञस्य

भूयादित्याहैष वै यज्ञस्य दोहस्तेनैवैनं दुहे प्रत्ता वै गौर्दुहे प्रत्तेडा

यजमानाय दुह एते वा इडायै स्तना इडोपहूतेति वायुर्वथ्सो यर्.हि

होतेडामुपह्वयेत तर्.हि यजमानो होतारमीक्षमाणो वायुं

मनसाद्ध्यायेन् – [ ] **2**

**TS 1.7.1.2 (Padam)**

यजते । अपीति । अन्यम् । यजमानम् । दुहे । सा । मे । सत्या ।

आशीरित्या–शीः । अस्य । यज्ञस्य । भूयात् । इति । आह । एषः । वै ।

यज्ञस्य । दोहः । तेन । एव । एनम् । दुहे । प्रत्ता । वै । गौः । दुहे ।

प्रत्ता । इडा । यजमानाय । दुहे । एते । वै । इडायै । स्तनाः । इडा ।

उपहूतेत्युप – हूता । इति । वायुः । वथ्सः । यर्.हि । होता । इडाम् ।

उपह्वयेतेत्युप – ह्वयेत । तर्.हि । यजमानः । होतारम् । ईक्षमाणः ।

वायुम् । मनसा । ध्यायेत् । **2 (50)**

**<u>TS 1.7.1.3</u>**

मात्रे वथ्स–मुपावसृजति सर्वेण वै यज्ञेन देवाः सुवर्गं ँलोकमायन्

पाकयज्ञेन मनुरश्राम्यथ्सेडा मनुमुपावर्तत तां देवासुरा व्यह्वयन्त

प्रतीचीं देवाः पराचीमसुराः सा देवानुपावर्तत पशवो वै तद्

देवानवृणत पशवो ऽसुरानजहुर्यं कामयेतापशुः स्यादिति पराचीं

तस्येडामुप ह्वयेतापशुरेव भवति यं – [ ] **3**

**<u>TS 1.7.1.3 (Padam)</u>**

मात्रे । वथ्सम् । उपावसृजतीत्युप–अवसृजति । सर्वेण । वै ।

यज्ञेन । देवाः । सुवर्गमिति सुवः – गम् । लोकम् । आयन्न् ।

पाकयज्ञेनेति पाक–यज्ञेन । मनुः । अश्राम्यत् । सा । इडा । मनुम् ।

उपावर्ततेत्युप – आवर्तत । ताम् । देवासुरा इति देव – असुराः ।

वीति । अह्वयन्त । प्रतीचीम् । देवाः । पराचीम् । असुराः । सा ।

देवान् । उपावर्ततेत्युप – आवर्तत । पशवः । वै । तत् । देवान् ।

अवृणत । पशवः । असुरान् । अजहुः । यम् । कामयेत ।

अपशुः । स्यात् । इति । पराचीम् । तस्य । इडाम् । उपेति ।

ह्वयेत । अपशुः । एव । भवति । यम् । **3 (50)**

**TS 1.7.1.4**

कामयेत पशुमान्थ् स्यादिति प्रतीचीं तस्येडा–मुप ह्वयेत पशुमानेव भवति ब्रह्मवादिनो वदन्ति स त्वा इडामुप ह्वयेत य इडामुप–हूयात्मान–मिडायामुपह्वयेतेति सा नः प्रिया सुप्रतूर्ति–र्मघोनीत्याहेडा–मेवोपहूयाऽऽत्मान–मिडायामुपह्वयते व्यस्तमिव वा एतद्यज्ञस्य यदिडा सामि प्राश्ञन्ति – [ ] **4**

**TS 1.7.1.4 (Padam)**

कामयेत । पशुमानिति पशु – मान् । स्यात् । इति । प्रतीचीम् ।

तस्य । इडाम् । उपेति । ह्वयेत । पशुमानिति पशु – मान् । एव ।

भवति । ब्रह्मवादिन इति ब्रह्म – वादिनः । वदन्ति । सः । तु । वै ।

इडाम् । उपेति । ह्वयेत । यः । इडाम् । उपहूयेत्युप – हूय ।

आत्मानम् । इडायाम् । उपह्वयेतेत्युप – ह्वयेत । इति । सा । नः ।

प्रिया । सुप्रतूर्तिरिति सु – प्रतूर्तिः । मघोनी । इति । आह ।
इडाम् । एव । उपहूयेत्युप – हूय । आत्मानम् । इडायाम् । उपेति ।
ह्वयते । व्यस्तमिति वि–अस्तम् । इव । वै । एतत् । यज्ञस्य । यत् ।
इडा । सामि । प्राश्ञन्तीति प्र – अश्ञन्ति । **4 (50)**

**<u>TS 1.7.1.5</u>**

सामि मार्जयन्त एतत् प्रति वा असुराणां ँयज्ञो व्यच्छिद्यत
ब्रह्मणा देवाः समदधु बृहस्पति–स्तनुतामिमं न इत्याह
ब्रह्म वै देवानां बृहस्पति ब्र्ह्मणैव यज्ञ९ं सं दधाति विच्छिन्नं
ँयज्ञ९ं समिमं दधात्वित्याह सन्तत्यै विश्वे देवा इह मादयन्तामित्याह
सन्तत्यैव यज्ञं देवेभ्यो ऽनु दिशति यां ँवै – [ ] 5

**<u>TS 1.7.1.5 (Padam)</u>**

सामि । मार्जयन्ते । एतत् । प्रतीति । वै । असुराणाम् । यज्ञः ।
वीति । अच्छिद्यत । ब्रह्मणा । देवाः । समिति । अदधुः ।
बृहस्पतिः । तनुताम् । इमम् । नः । इति । आह । ब्रह्म । वै ।
देवानाम् । बृहस्पतिः । ब्रह्मणा । एव । यज्ञम् । समिति ।
दधाति । विच्छिन्नमिति वि – छिन्नम् । यज्ञम् । समिति । इमम् ।

दधातु । इति । आह । सन्तत्या इति सं – तत्यै । विश्वे । देवाः ।

इह । मादयन्ताम् । इति । आह । सन्तत्येति सं – तत्य । एव ।

यज्ञम् । देवेभ्यः । अन्विति । दिशति । याम् । वै । **5 (50)**

**<u>TS 1.7.1.6</u>**

यज्ञे दक्षिणां ददाति तामस्य पशवो ऽनु सं क्रामन्ति स एष

ईजानो ऽपशुर्भावुको यजमानेन खलु वै तत्कार्य–मित्याहु र्यथा

देवत्रा दत्तं कुर्वीतात्मन् पशून् रमयेतेति ब्रद्ध्न पिन्वस्वेत्याह

यज्ञो वै ब्रद्ध्नो यज्ञमेव तन्महयत्यथो देवत्रैव दत्तं कुरुत

आत्मन् पशून् रमयते ददतो मे ( ) मा क्षायीत्याहाक्षिति–मेवोपैति

कुर्वतो मे मोप दसदित्याह भूमानमेवोपैति ॥ **6**

**<u>TS 1.7.1.6 (Padam)</u>**

यज्ञे । दक्षिणाम् । ददाति । ताम् । अस्य । पशवः । अनु । समिति ।

क्रामन्ति । सः । एषः । ईजानः । अपशुः । भावुकः । यजमानेन ।

खलु । वै । तत् । कार्यम् । इति । आहुः । यथा । देवत्रेति

देव – त्रा । दत्तम् । कुर्वीत । आत्मन्न् । पशून् । रमयेत । इति ।

ब्रद्ध्न । पिन्वस्व । इति । आह । यज्ञः । वै । ब्रद्ध्नः । यज्ञम् ।

एव । तत् । महयति । अथो इति । देवत्रेति देव - त्रा । एव ।
दत्तम् । कुरुते । आत्मन्न् । पशून् । रमयते । ददतः । मे ( ) । मा ।
क्षायि । इति । आह । अक्षितिम् । एव । उपेति । एति । कुर्वतः ।
मे । मा । उपेति । दसत् । इति । आह । भूमानम् ।
एव । उपेति । एति ॥ **6 (69) (विद्वान्-ध्यायेद्-भवति यं-प्राऽञ्जन्ति-यांँ वै-म-एकान्नविꣳशतिश्च )***(A1)*

**TS 1.7.2.1**

सꣳश्रवा ह सौवर्चनस स्तुमिञ्जमौपोदिति-मुवाच
यथ्सत्रिणाꣳ होता ऽभूः कामिडामुपाह्वथा इति
तामुपाह्व इति होवाच या प्राणेन देवान् दाधार व्यानेन मनुष्यानपानेन
पितृनिति छिनत्ति सा न छिनत्ती(३) इति छिनत्तीति होवाच शरीरं ँवा
अस्यै तदुपाह्वथा इति होवाच गौर्वा - [ ] **7**

**TS 1.7.2.1 (Padam)**

सꣳश्रवा इति सं - श्रवाः । ह । सौवर्चनसः । तुमिञ्जम् ।
औपोदितिमित्यौप - उदितिम् । उवाच । यत् । सत्रिणाम् । होता ।
अभूः । काम् । इडाम् । उपेति । अह्वथाः । इति । ताम् । उपेति ।

अह्वे । इति । ह । उवाच । या । प्राणेनेति प्र – अनेन । देवान् ।
दाधार । व्यानेनेति वि – अनेन । मनुष्यान् । अपानेनेत्यप–अनेन ।
पितॄन् । इति । छिनत्ति । सा । न । छिनत्ती(3) । इति । छिनत्ति ।
इति । ह । उवाच । शरीरम् । वै । अस्यै । तत् । उपेति । अह्वथाः ।
इति । ह । उवाच । गौः । वै । **7 (50)**

**TS 1.7.2.2**

अस्यै शरीरं गां ँवाव तौ तत् पर्यवदतां ँया यज्ञे दीयते सा
प्राणेन देवान् दाधार यया मनुष्या जीवन्ति सा व्यानेन
मनुष्यान्. यां पितृभ्यो घ्नन्ति सा ऽपानेन पितॄन्. य एवं ँवेद
पशुमान् भवत्यथ वै तामुपाह्व इति होवाच या प्रजाः प्रभवन्तीः
प्रत्याभवतीत्यन्नं ँवा अस्यै तदु – [ ] **8**

**TS 1.7.2.2 (Padam)**

अस्यै । शरीरम् । गाम् । वाव । तौ । तत् । परीति । अवदताम् ।
या । यज्ञे । दीयते । सा । प्राणेनेति प्र – अनेन । देवान् । दाधार ।
यया । मनुष्याः । जीवन्ति । सा । व्यानेनेति वि – अनेन ।
मनुष्यान् । याम् । पितृभ्य इति पितृ – भ्यः । घ्नन्ति । सा ।

अपानेनेत्यप – अनेन । पितॄन् । यः । एवम् । वेद ।

पशुमानिति पशु–मान् । भवति । अथ । वै । ताम् । उपेति । अह्वे ।

इति । ह । उवाच । या । प्रजा इति प्र – जाः ।

प्रभवन्तीरिति प्र – भवन्तीः । प्रतीति । आभवतीत्या – भवति ।

इति । अन्नम् । वै । अस्यै । तत् । **8 (50)**

**TS 1.7.2.3**

पाह्वथा इति होवाचौषधयो वा अस्या अन्नमोषधयो वै प्रजाः

प्रभवन्तीः प्रत्या भवन्ति य एवं वेदान्नादो भवत्यथ वै तामुपाह्व इति

होवाच या प्रजाः पराभवन्ती–रनुगृह्णाति प्रत्याभवन्ती गृह्णातीति प्रतिष्ठां

वा अस्यै तदुपाह्वथा इति होवाचेयं वा अस्यै प्रतिष्ठे– [ ] **9**

**TS 1.7.2.3 (Padam)**

उपेति । अह्वथाः । इति । ह । उवाच । ओषधयः । वै । अस्याः ।

अन्नम् । ओषधयः । वै । प्रजा इति प्र – जाः । प्रभवन्तीरिति

प्र – भवन्तीः । प्रति । एति । भवन्ति । यः । एवम् । वेद ।

अन्नाद इत्यन्न – अदः । भवति । अथ । वै । ताम् । उपेति । अह्वे ।

इति । ह । उवाच । या । प्रजा इति प्र – जाः । पराभवन्तीरिति
परा – भवन्तीः । अनुगृह्णातीत्यनु – गृह्णाति । प्रतीति ।
आभवन्तीरित्या – भवन्तीः । गृह्णाति । इति । प्रतिष्ठामिति
प्रति – स्थाम् । वै । अस्यै । तत् । उपेति । अह्वथाः । इति । ह ।
उवाच । इयम् । वै । अस्यै । प्रतिष्ठेति प्रति – स्था । **9 (50)**

**TS 1.7.2.4**

यं ँवै प्रजाः पराभवन्तीरनु गृह्णाति प्रत्याभवन्ती गृह्णाति
य एवं ँवेद प्रत्येव तिष्ठत्यथ वै तामुपाह्व इति होवाच यस्यै
निक्रमणे घृतं प्रजाः सञ्जीवन्तीः पिबन्तीति छिनत्ति सा न छिनत्ती(3)
इति न छिनत्तीति होवाच प्र तु जनयतीत्येष वा इडामुपाह्वथा इति
( ) होवाच वृष्टिर्वा इडा वृष्ट्यै वै निक्रमणे घृतं प्रजाः सञ्जीवन्तीः
पिबन्ति य एवं ँवेद प्रैव जायते ऽन्नादो भवति ॥ **10**

**TS 1.7.2.4 (Padam)**

इयम् । वै । प्रजा इति प्र – जाः । पराभवन्तीरिति परा – भवन्तीः ।
अन्विति । गृह्णाति । प्रतीति । आभवन्तीरित्या – भवन्तीः । गृह्णाति ।
यः । एवम् । वेद । प्रतीति । एव । तिष्ठति । अथ । वै । ताम् ।

उपेति । अह्वे । इति । ह । उवाच । यस्यै । निक्रमण इति
नि – क्रमणे । घृतम् । प्रजा इति प्र – जाः । सञ्जीवन्तीरिति
सं – जीवन्तीः । पिबन्ति । इति । छिनत्ति । सा । न ।
छिनत्ती(3) । इति । न । छिनत्ति । इति । ह । उवाच । प्रेति । तु ।
जनयति । इति । एषः । वै । इडाम् । उपेति । अह्वथाः ।
इति ( ) । ह । उवाच । वृष्टिः । वै । इडा । वृष्ट्यै । वै ।
निक्रमण इति नि – क्रमणे । घृतम् । प्रजा इति प्र – जाः ।
सञ्जीवन्तीरिति सं – जीवन्तीः । पिबन्ति । यः । एवम् । वेद ।
प्रेति । एव । जायते । अन्नाद इत्यन्न – अदः । भवति ॥ **10 (70)**

**(गौर्वा–अस्यै–तत्–प्रतिष्ठा–ऽह्वथा–इति–विꣳशतिश्च)** *(A2)*

**TS 1.7.3.1**

परोक्षं ँवा अन्ये देवा इज्यन्ते प्रत्यक्षमन्ये यद्यजते य एव देवाः
परोक्षमिज्यन्ते तानेव तद्यजतियदन्वाहार्य–माहरत्येते वै देवाः प्रत्यक्षं
ँयद् ब्राह्मणास्तानेव तेन प्रीणात्यथो दक्षिणैवास्यैषा ऽथो यज्ञस्यैव
छिद्रमपि दधाति यद्–वै यज्ञस्य क्रूरं ँयद्–विलिष्टं तदन्वाहार्येणा–[ ]**11**

**TS 1.7.3.1 (Padam)**

परोक्षमिति परः – अक्षम् । वै । अन्ये । देवाः । इज्यन्ते ।

प्रत्यक्षमिति प्रति – अक्षम् । अन्ये । यत् । यजते । ये । एव ।

देवाः । परोक्षमिति परः – अक्षम् । इज्यन्ते । तान् । एव । तत् ।

यजति । यत् । अन्वाहार्यमित्यनु – आहार्यम् । आहरतीत्या–हरति ।

एते । वै । देवाः । प्रत्यक्षमिति प्रति – अक्षम् । यत् । ब्राह्मणाः ।

तान् । एव । तेन । प्रीणाति । अथो इति । दक्षिणा । एव । अस्य ।

एषा । अथो इति । यज्ञस्य । एव । छिद्रम् । अपीति । दधाति ।

यत् । वै । यज्ञस्य । क्रूरम् । यत् । विलिष्टमिति वि – लिष्टम् ।

तत् । अन्वाहार्येणेत्यनु – आहार्येण । **11 (50)**

**TS 1.7.3.2**

ऽन्वाहरति तदन्वाहार्यस्या–न्वाहार्यत्वं देवदूता वा एते यदृत्विजो

यदन्वाहार्य–माहरति देवदूतानेव प्रीणातिप्रजापतिर्देवेभ्यो यज्ञान्

व्यादिशथ् स रिरिचानो ऽमन्यत स एतमन्वाहार्य–मभक्त–मपश्यत्

तमात्मन्नधत्त स वा एष प्राजापत्यो यदन्वाहार्यो यस्यैवं ँविदुषो ऽन्वाहार्य

आह्रियते साक्षादेव प्रजापतिमृद्ध्नोत्य–परिमितोनिरुप्यो ऽपरिमितः प्रजापतिः प्रजापते– [ ] 12

**TS 1.7.3.2 (Padam)**

अन्वाहरतीत्यनु – आहरति । तत् । अन्वाहार्यस्येत्यनु–आहार्यस्य । अन्वाहार्यत्वमित्यन्वाहार्य – त्वम् । देवदूता इति देव – दूताः । वै । एते । यत् । ऋत्विजः । यत् । अन्वाहार्यमित्यनु – आहार्यम् । आहरतीत्या – हरति । देवदूतानिति देव – दूतान् । एव । प्रीणाति । प्रजापतिरिति प्रजा – पतिः । देवेभ्यः । यज्ञान् । व्यादिशदिति वि – आदिशत् । सः । रिरिचानः । अमन्यत । सः । एतम् । अन्वाहार्यमित्यनु – आहार्यम् । अभक्तम् । अपश्यत् । तम् । आत्मन्न् । अधत्त । सः । वै । एषः । प्राजापत्य इति प्राजा–पत्यः । यत् । अन्वाहार्य इत्यनु – आहार्यः । यस्य । एवम् । विदुषः । अन्वाहार्य इत्यनु – आहार्यः । आह्रियत इत्या – ह्रियते । साक्षादिति स – अक्षात् । एव । प्रजापतिमिति प्रजा – पतिम् । ऋद्ध्नोति । अपरिमित इत्यपरि – मितः । निरुप्य इति निः–उप्यः ।

अपरिमित इत्यपरि – मितः । प्रजापतिरिति प्रजा – पतिः ।

प्रजापतेरिति प्रजा – पतेः । **12 (50)**

**TS 1.7.3.3**

राप्त्यै देवा वै यद्यज्ञे ऽकुर्वत तदसुरा अकुर्वत ते देवा एतं

प्राजापत्य–मन्वाहार्य–मपश्यन् तमन्वाहरन्त ततो देवा अभवन्

परा ऽसुरा यस्यैवं ँविदुषो ऽन्वाहार्य आह्रियते भवत्यात्मना परा ऽस्य

भ्रातृव्यो भवति यज्ञेन वा इष्टी पक्वेन पूर्ती यस्यैवं ँविदुषो ऽन्वाहार्य

आह्रियते स त्वेवेष्टापूर्ती प्रजापतेर्भागो ऽसी– [ ] **13**

**TS 1.7.3.3 (Padam)**

आप्त्यै । देवाः । वै । यत् । यज्ञे । अकुर्वत । तत् । असुराः ।

अकुर्वत । ते । देवाः । एतम् । प्राजापत्यमिति प्राजा – पत्यम् ।

अन्वाहार्यमित्यनु – आहार्यम् । अपश्यन्न् । तम् ।

अन्वाहरन्तेत्यनु – आहरन्त । ततः । देवाः । अभवन्न् । परेति ।

असुराः । यस्य । एवम् । विदुषः । अन्वाहार्य इत्यनु – आहार्यः ।

आह्रियत इत्या – ह्रियते । भवति । आत्मना । परेति । अस्य ।

भ्रातृव्यः । भवति । यज्ञेन । वै । इष्टी । पक्वेन । पूर्ती । यस्य ।

एवम् । विदुषः । अन्वाहार्य इत्यनु – आहार्यः ।
आह्रियत इत्या – ह्रियते । सः । तु । एव । इष्टापूर्तीतीष्ट – पूर्ती ।
प्रजापतेरिति प्रजा – पतेः । भागः । असि । **13 (50)**

**TS 1.7.3.4**

त्याह प्रजापतिमेव भागधेयेन समर्द्धयत्यूर्जस्वान्
पयस्वानित्याहोर्ज–मेवास्मिन् पयो दधाति प्राणापानौ मे पाहि
समानव्यानौ मे पाहीत्याहाऽऽशिषमेवैतामा शास्ते ऽक्षितो
ऽस्यक्षित्यै त्वा मा मे क्षेष्ठा अमुत्रामुष्मिन् ँल्लोक इत्याह क्षीयते
वा अमुष्मिन् ँल्लोके ऽन्न–मितःप्रदान७ ह्यमुष्मिन् ँल्लोके ( )
प्रजा उपजीवन्ति यदेव– मभिमृशत्यक्षिति–मेवैनद्गमयति
नास्यामुष्मिन् ँल्लोके ऽन्नं क्षीयते ॥ **14**

**TS 1.7.3.4 (Padam)**

इति । आह । प्रजापतिमिति प्रजा – पतिम् । एव । भागधेयेनेति
भाग – धेयेन । समिति । अर्द्धयति । ऊर्जस्वान् । पयस्वान् ।
इति । आह । ऊर्जम् । एव । अस्मिन्न् । पयः । दधाति ।
प्राणापानाविति प्राण –अपानौ । मे । पाहि ।

समानव्यानाविति समान – व्यानौ । मे । पाहि । इति । आह ।

आशिषमित्या – शिषम् । एव । एताम् । एति । शास्ते । अक्षितः ।

असि । अक्षित्यै । त्वा । मा । मे । क्षेष्ठाः । अमुत्र । अमुष्मिन्न् ।

लोके । इति । आह । क्षीयते । वै । अमुष्मिन्न् । लोके । अन्नम् ।

इतःप्रदानमितीतः – प्रदानम् । हि । अमुष्मिन्न् । लोके ( ) ।

प्रजा इति प्र – जाः । उपजीवन्तीत्युप – जीवन्ति । यत् । एवम् ।

अभिमृशतीत्यभि – मृशति । अक्षितिम् । एव । एनत् । गमयति ।

न । अस्य । अमुष्मिन्न् । लोके । अन्नम् । क्षीयते ॥ **14 (65)**

**(अन्वाहार्येण–प्रजापते–रसि–ह्यमुष्मिन् ँलोके–पञ्चदश च )***(A3)*

**TS 1.7.4.1**

बर्.हिषो ऽहं देवयज्यया प्रजावान् भूयासमित्याह बर्.हिषा वै

प्रजापतिः प्रजा असृजत तेनैव प्रजाः सृजते नराश७्

सस्याहं देवयज्यया पशुमान् भूयासमित्याह नराश७्सेन वै

प्रजापतिः पशूनसृजत तेनैव पशून्थ् सृजते ऽग्नेः स्विष्टकृतो ऽहं

देवयज्यया ऽऽयुष्मान्. यज्ञेन प्रतिष्ठां गमेयमित्याहाऽऽयुरेवात्मन्
धत्ते प्रति यज्ञेन तिष्ठति दर्.शपूर्णमासयोर् – [ ] **15**

**TS 1.7.4.1 (Padam)**

बर्.हिषः । अहम् । देवयज्ययेति देव – यज्यया । प्रजावानिति
प्रजा –वान् । भूयासम् । इति । आह । बर्.हिषा । वै । प्रजापतिरिति
प्रजा – पतिः । प्रजा इति प्र – जाः । असृजत । तेन । एव ।
प्रजा इति प्र – जाः । सृजते । नराश॒ंसस्य । अहम् ।
देवयज्ययेति देव – यज्यया । पशुमानिति पशु–मान् । भूयासम् ।
इति । आह । नराश॒ंसेन । वै । प्रजापतिरिति प्रजा – पतिः ।
पशून् । असृजत । तेन । एव । पशून् । सृजते । अग्नेः ।
स्विष्टकृत इति स्विष्ट – कृतः । अहम् । देवयज्ययेति देव – यज्यया ।
आयुष्मान् । यज्ञेन । प्रतिष्ठामिति प्रति–स्थाम् । गमेयम् । इति ।
आह । आयुः । एव । आत्मन्न् । धत्ते । प्रतीति । यज्ञेन । तिष्ठति ।
दर्.शपूर्णमासयोरिति दर्.श – पूर्णमासयोः । **15 (50)**

**TS 1.7.4.2**

वै देवा उज्जिति–मनूदजयन् दर्.शपूर्णमासाभ्या–मसुरानपा–
नुदन्ताग्ने–रहमुज्जिति–मनूज्जेष–मित्याह दर्.शपूर्णमासयोरेव
देवतानां यजमान उज्जितिमनूज्जयति दर्.शपूर्णमासाभ्यां भ्रातृव्यानप
नुदते वाजवतीभ्यां व्यूहत्यन्नं वै वाजो ऽन्नमेवाव रुन्धे द्वाभ्यां
प्रतिष्ठित्यैयो वै यज्ञस्य द्वौ दोहौ विद्वान्. यजत उभयत – [ ] **16**

**TS 1.7.4.2 (Padam)**

वै । देवाः । उज्जितिमित्युत् – जितिम् । अनु । उदिति । अजयन्न् ।
दर्.शपूर्णमासाभ्यामिति दर्.श–पूर्णमासाभ्याम् । असुरान् । अपेति ।
अनुदन्त । अग्नेः । अहम् । उज्जितिमित्युत् – जितिम् । अनु ।
उदिति । जेषम् । इति । आह । दर्.शपूर्णमासयोरिति
दर्.श – पूर्णमासयोः । एव । देवतानाम् । यजमानः ।
उज्जितिमित्युत् – जितिम् । अनु । उदिति । जयति ।
दर्.शपूर्णमासाभ्यामिति दर्.श–पूर्णमासाभ्याम् । भ्रातृव्यान् ।
अपेति । नुदते । वाजवतीभ्यामिति वाज – वतीभ्याम् । वीति ।
ऊहति । अन्नम् । वै । वाजः । अन्नम् । एव । अवेति । रुन्धे ।

द्वाभ्याम् । प्रतिष्ठित्या इति प्रति – स्थित्यै । यः । वै । यज्ञस्य । द्वौ । दोहौ । विद्वान् । यजते । उभयतः । **16 (50)**

**TS 1.7.4.3**

एव यज्ञं दुहे पुरस्ताच्चोपरिष्टाच्चैष वा अन्यो यज्ञस्य दोह इडायामन्यो यर्.हि होता यजमानस्य नाम गृह्णीयात् तर्.हि ब्रूयादेमा अग्मन्नाशिषो दोहकामा इति सꣳस्तुता एव देवता दुहे ऽथो उभयत एव यज्ञं दुहे पुरस्ता–च्चोपरिष्टा–च्चरोहितेन त्वा ऽग्निर्देवतां गमयत्वित्याहैते वै देवाश्वा – [ ] **17**

**TS 1.7.4.3 (Padam)**

एव । यज्ञम् । दुहे । पुरस्तात् । च । उपरिष्टात् । च । एषः । वै । अन्यः । यज्ञस्य । दोहः । इडायाम् । अन्यः । यर्.हि । होता । यजमानस्य । नाम । गृह्णीयात् । तर्.हि । ब्रूयात् । एति । इमाः । अग्मन् । आशिष इत्या – शिषः । दोहकामा इति दोह – कामाः । इति । सꣳस्तुता इति सं – स्तुताः । एव । देवताः । दुहे । अथो इति । उभयतः । एव । यज्ञम् । दुहे । पुरस्तात् । च ।

उपरिष्टात् । च । रोहितेन । त्वा । अग्निः । देवताम् । गमयतु । इति ।
आह । एते । वै । देवाश्वा इति देव – अश्वाः । **17 (50)**

**TS 1.7.4.4**

यजमानः प्रस्तरो यदेतैः प्रस्तरं प्रहरति देवाश्वैरेव यजमान७ं
सुवर्गं ँल्लोकं गमयति वि ते मुञ्चामि रशना वि रश्मीनित्याहैष वा
अग्नेर्विमोकस्ते–नैवैनं ँवि मुञ्चतिविष्णोः शँयोरहं देवयज्यया
यज्ञेन प्रतिष्ठां गमेयमित्याहयज्ञो वै विष्णुर्यज्ञ एवान्ततः प्रति तिष्ठति
सोमस्याहं देवयज्यया सुरेता – [ ] **18**

**TS 1.7.4.4 (Padam)**

यजमानः । प्रस्तर इति प्र – स्तरः । यत् । एतैः । प्रस्तरमिति
प्र – स्तरम् । प्रहरतीति प्र – हरति । देवाश्वैरिति देव – अश्वैः ।
एव । यजमानम् । सुवर्गमिति सुवः – गम् । लोकम् । गमयति ।
वीति । ते । मुञ्चामि । रशनाः । वीति । रश्मीन् । इति । आह ।
एषः । वै । अग्नेः । विमोक इति वि – मोकः । तेन । एव । एनम् ।
वीति । मुञ्चति । विष्णोः । शँयोरिति शं – योः । अहम् ।
देवयज्ययेति देव – यज्यया । यज्ञेन । प्रतिष्ठामिति प्रति – स्थाम् ।

गमेयम् । इति । आह । यज्ञः । वै । विष्णुः । यज्ञे । एव । अन्ततः । प्रतीति । तिष्ठति । सोमस्य । अहम् । देवयज्ययेति देव – यज्यया । सुरेता इति सु – रेताः । **18 (50)**

**<u>TS 1.7.4.5</u>**

रेतो धिषीयेत्याह सोमो वै रेतोधास्तेनैव रेत आत्मन् धत्तेत्वष्टुरहं देवयज्यया पशूना॒ꣳ रूपं पुषेयमित्याहत्वष्टा वै पशूनां मिथुनाना॒ꣳ रूपकृत्तेनैव पशूना॒ꣳरूपमात्मन् धत्ते देवानां पत्नीरग्निर्गृहपति र्यज्ञस्य मिथुनं तयोरहं देवयज्यया मिथुनेन प्र भूयास– मित्याहैतस्माद्वै मिथुनात् प्रजापति र्मिथुनेन – [ ] **19**

**<u>TS 1.7.4.5 (Padam)</u>**

रेतः । धिषीय । इति । आह । सोमः । वै । रेतोधा इति रेतः–धाः । तेन । एव । रेतः । आत्मन्न् । धत्ते । त्वष्टुः । अहम् । देवयज्ययेति देव – यज्यया । पशूनाम् । रूपम् । पुषेयम् । इति । आह । त्वष्टा । वै । पशूनाम् । मिथुनानाम् । रूपकृदिति रूप – कृत् । तेन । एव । पशूनाम् । रूपम् । आत्मन्न् । धत्ते । देवानाम् । पत्नीः । अग्निः । गृहपतिरिति गृह – पतिः । यज्ञस्य । मिथुनम् । तयोः । अहम् ।

देवयज्ययेति देव – यज्यया । मिथुनेन । प्रेति । भूयासम् । इति । आह । एतस्मात् । वै । मिथुनात् । प्रजापतिरिति प्रजा – पतिः । मिथुनेन । **19 (50)**

**TS 1.7.4.6**

प्राजायत तस्मादेव यजमानो मिथुनेन प्र जायतेवेदो ऽसि वित्तिरसि विदेयेत्याह वेदेन वै देवा असुराणां ँवित्तं ँवेद्यमविन्दन्त तद्वेदस्य वेदत्वं ँयद्यद् भ्रातृव्यस्याभिद्ध्यायेत् तस्य नाम गृह्णीयात् तदेवास्य सर्वं ँवृङ्क्ते घृतवन्तं कुलायिन७ँ रायस्पोष७ँ सहस्रिणं ँवेदो ददातु वाजिनमित्याह प्र सहस्रं पशूनाप्नोत्या ( ) स्य प्रजायां ँवाजी जायते य एवं ँवेद ॥ **20**

**TS 1.7.4.6 (Padam)**

प्रेति । अजायत । तस्मात् । एव । यजमानः । मिथुनेन । प्रेति । जायते । वेदः । असि । वित्तिः । असि । विदेय । इति । आह । वेदेन । वै । देवाः । असुराणाम् । वित्तम् । वेद्यम् । अविन्दन्त । तत् । वेदस्य । वेदत्वमिति वेद – त्वम् । यद्यदिति यत् – यत् । भ्रातृव्यस्य । अभिद्ध्यायेदित्यभि–ध्यायेत् । तस्य । नाम । गृह्णीयात् ।

तत् । एव । अस्य । सर्वम् । वृङ्क्ते । घृतवन्तमिति घृत – वन्तम् ।
कुलायिनम् । रायः । पोषम् । सहस्रिणम् । वेदः । ददातु ।
वाजिनम् । इति । आह । प्रेति । सहस्रम् । पशून् । आप्नोति ( ) ।
एति । अस्य । प्रजायामिति प्र – जायाम् । वाजी । जायते । यः ।
एवम् । वेद ॥ **20 (58)**

**(दर्.शपूर्णमासयो–रुभयतो–देवाश्वाः–सुरेताः–प्रजापतिर्मिथुनेना–प्नोत्य–ष्टौ च)** *(A4)*

**TS 1.7.5.1**

ध्रुवां ँवै रिच्यमानां ँयज्ञो ऽनु रिच्यते यज्ञं ँयजमानो यजमानं प्रजा
ध्रुवामाप्यायमानां ँयज्ञो ऽन्वा प्यायते यज्ञं ँयजमानो यजमानं प्रजा
आ प्यायतां ध्रुवा घृतेनेत्याह ध्रुवामेवाऽऽ प्याययति–तामाप्यायमानां
ँयज्ञो ऽन्वा प्यायते यज्ञं ँयजमानो यजमानं प्रजाः प्रजापतेर्विभान्नाम
लोकस्तस्मिँस्त्वा दधामि सह यजमानेनेत्या – [ ] **21**

**TS 1.7.5.1 (Padam)**

ध्रुवाम् । वै । रिच्यमानाम् । यज्ञः । अन्विति । रिच्यते । यज्ञम् ।
यजमानः । यजमानम् । प्रजा इति प्र – जाः । ध्रुवाम् ।

आप्यायमानामित्या – प्यायमानाम् । यज्ञः । अनु । एति । प्यायते ।
यज्ञम् । यजमानः । यजमानम् । प्रजा इति प्र – जाः । एति ।
प्यायताम् । ध्रुवा । घृतेन । इति । आह । ध्रुवाम् । एव । एति ।
प्याययति । ताम् । आप्यायमानामित्या – प्यायमानाम् । यज्ञः ।
अनु । एति । प्यायते । यज्ञम् । यजमानः । यजमानम् । प्रजा इति
प्र – जाः । प्रजापतेरिति प्रजा – पतेः । विभानिति वि – भान् । नाम ।
लोकः । तस्मिन्न् । त्वा । दधामि । सह । यजमानेन । इति । **21 (50)**

**<u>TS 1.7.5.2</u>**

हायं ँवै प्रजापते र्विभान्नाम लोकस्तस्मिन्नेवैनं दधाति सह यजमानेन
रिच्यत इव वा एतद्यद्यजतेयद्यजमानभागं प्राश्ञात्यात्मानमेव
प्रीणात्येतावान्. वै यज्ञो यावान्. यजमानभागो यज्ञो यजमानो
यद्यजमानभागं प्राश्ञाति यज्ञ एव यज्ञं प्रति ष्ठापयत्येतद्–वै सूयवस(ं)
सोदकं ँयद् बर्.हिश्चाऽऽपश्चैतद् – [ ] **22**

**<u>TS 1.7.5.2 (Padam)</u>**

आह । अयम् । वै । प्रजापतेरिति प्रजा – पतेः । विभानिति
वि – भान् । नाम । लोकः । तस्मिन्न् । एव । एनम् । दधाति ।

सह । यजमानेन । रिच्यते । इव । वै । एतत् । यत् । यजते । यत् ।

यजमानभागमिति यजमान – भागम् । प्राश्ञातीति प्र – अश्ञाति ।

आत्मानम् । एव । प्रीणाति । एतावान् । वै । यज्ञः । यावान् ।

यजमानभाग इति यजमान – भागः । यज्ञः । यजमानः । यत् ।

यजमानभागमिति यजमान – भागम् । प्राश्ञातीति प्र – अश्ञाति ।

यज्ञे । एव । यज्ञम् । प्रतीति । स्थापयति । एतत् । वै ।

सूयवसमिति सु – यवसम् । सोदकमिति स – उदकम् । यत् ।

बर्.हिः । च । आपः । च । एतत् । **22 (50)**

**TS 1.7.5.3**

यजमानस्याऽऽयतनं ँयद्-वेदिर्यत् पूर्णपात्र-मन्तर्वेदि निनयति स्व

एवाऽऽयतने सूयवस॒ꣳ सोदकं कुरुते सदसि सन्मे भूया

इत्याहाऽऽपो वै यज्ञ आपो ऽमृतं ँयज्ञमेवामृत-मात्मन् धत्ते सर्वाणि

वै भूतानि व्रत-मुपयन्त-मनूपयन्ति प्राच्यां दिशि देवा ऋत्विजो

मार्जयन्तामित्याहैष वै दर्.शपूर्णमासयो-रवभृथो – [ ] 23

**TS 1.7.5.3 (Padam)**

यजमानस्य । आयतनमित्या – यतनम् । यत् । वेदिः । यत् ।

पूर्णपात्रमिति पूर्ण – पात्रम् । अन्तर्वेदीत्यन्तः – वेदि ।

निनयतीति नि – नयति । स्वे । एव । आयतन इत्या – यतने ।

सूयवसमिति सु – यवसम् । सोदकमिति स – उदकम् । कुरुते ।

सत् । असि । सत् । मे । भूयाः । इति । आह । आपः । वै । यज्ञः ।

आपः । अमृतम् । यज्ञम् । एव । अमृतम् । आत्मन्न् । धत्ते । सर्वाणि ।

वै । भूतानि । व्रतम् । उपयन्तमित्युप – यन्तम् । अनु । उपेति । यन्ति ।

प्राच्याम् । दिशि । देवाः । ऋत्विजः । मार्जयन्ताम् । इति । आह ।

एषः । वै । दर्.शपूर्णमासयोरिति दर्.श – पूर्णमासयोः ।

अवभृथ इत्यव – भृथः । **23 (50)**

**TS 1.7.5.4**

यान्येवैनं भूतानि व्रतमुपयन्त–मनूपयन्ति तैरेव सहावभृथमवैति

विष्णुमुखा वै देवाः छन्दोभिरिमान् ँल्लोका–ननपजय्यमभ्यजयन्.

यद्–विष्णुक्रमान् क्रमते विष्णुरेव भूत्वा यजमानः छन्दोभिरिमान्–

ँल्लोका–ननपजय्यमभि जयति विष्णोः क्रमो ऽस्यभिमातिहेत्याह गायत्री

वै पृथिवी त्रैष्टुभमन्तरिक्षं जागतीद्यौरानुष्टुभीर्दिशः छन्दोभिरेवेमान्–

ँल्लोकान्. यथापूर्वमभि जयति ॥ **24**

**TS 1.7.5.4 (Padam)**

यानि । एव । एनम् । भूतानि । व्रतम् । उपयन्तमित्युप – यन्तम् ।

अनूपयन्तीत्यनु – उपयन्ति । तैः । एव । सह ।

अवभृथमित्यव – भृथम् । अवेति । एति । विष्णुमुखा इति

विष्णु – मुखाः । वै । देवाः । छन्दोभिरिति छन्दः – भिः । इमान् ।

लोकान् । अनपजय्यमित्यनप–जय्यम् । अभीति । अजयन्न् । यत् ।

विष्णुक्रमानिति विष्णु – क्रमान् । क्रमते । विष्णुः । एव । भूत्वा ।

यजमानः । छन्दोभिरिति छन्दः – भिः । इमान् । लोकान् ।

अनपजय्यमित्यनप – जय्यम् । अभीति । जयति । विष्णोः । क्रमः ।

असि । अभिमातिहेत्यभिमाति – हा । इति । आह । गायत्री ।

वै । पृथिवी । त्रैष्टुभम् । अन्तरिक्षम् । जागती । द्यौः ।

आनुष्टुभीरित्यानु – स्थुभीः । दिशः ( ) ।

छन्दोभिरिति छन्दः – भिः । एव । इमान् । लोकान् ।

यथापूर्वमिति यथा – पूर्वम् । अभीति । जयति ॥ 24 (57)

**(यजमानेनेति–चै तद–वभृथो–दिशः–सप्त च)** *(A5)*

**TS 1.7.6.1**

अगन्म सुवः सुवरगन्मेत्याह सुवर्गमेव लोकमेतिसन्दृशस्ते

मा छित्थ्सि यत्ते तपस्तस्मै ते मा ऽऽ वृक्षीत्याहयथा–यजुरेवैतथ् सुभूरसि

श्रेष्ठो रश्मीनामायुर्द्धा अस्यायुर्मे धेहीत्याहाऽऽशिषमेवैतामा शास्ते

प्र वा एषो ऽस्मान्ँ लोकाच्च्यवते यो – [ ] 25

**TS 1.7.6.1 (Padam)**

अगन्म । सुवः । सुवः । अगन्म । इति । आह । सुवर्गमिति

सुवः – गम् । एव । लोकम् । एति । सन्दृश इति सं –दृशः । ते ।

मा । छित्थ्सि । यत् । ते । तपः । तस्मै । ते । मा । एति । वृक्षि ।

इति । आह । यथायजुरिति यथा – यजुः । एव । एतत् । सुभूरिति

सु– भूः । असि । श्रेष्ठः । रश्मीनाम् । आयुर्द्धा इत्यायुः – धाः ।

असि । आयुः । मे । धेहि । इति । आह । आशिषमित्या–शिषम् ।

एव । एताम् । एति । शास्ते । प्रेति । वै । एषः । अस्मात् ।

लोकात् । च्यवते । यः । 25 (50)

**TS 1.7.6.2**

विष्णुक्रमान् क्रमते सुवर्गाय हि लोकाय विष्णुक्रमाः क्रम्यन्ते

ब्रह्मवादिनो वदन्ति स त्वै विष्णुक्रमान् क्रमेत य इमान् ँल्लोकान्

भ्रातृव्यस्य सँविद्य पुनरिमं ँल्लोकं प्रत्यवरोहेदित्येष वा अस्य लोकस्य

प्रत्यवरोहो यदाहेदमहममुं भ्रातृव्यमाभ्यो दिग्भ्यो ऽस्यै दिव इतीमानेव

लोकान् भ्रातृव्यस्य सँविद्य पुनरिमं ँल्लोकं प्रत्यवरोहति सं – [ ] **26**

**TS 1.7.6.2 (Padam)**

विष्णुक्रमानिति विष्णु – क्रमान् । क्रमते । सुवर्गायेति सुवः–गाय ।

हि । लोकाय । विष्णुक्रमा इति विष्णु – क्रमाः । क्रम्यन्ते ।

ब्रह्मवादिन इति ब्रह्म – वादिनः । वदन्ति । सः । तु । वै ।

विष्णुक्रमानिति विष्णु – क्रमान् । क्रमेत । यः । इमान् । लोकान् ।

भ्रातृव्यस्य । सम्विद्येति सं – विद्य । पुनः । इमम् । लोकम् ।

प्रत्यवरोहेदिति प्रति – अवरोहेत् । इति । एषः । वै । अस्य ।

लोकस्य । प्रत्यवरोह इति प्रति – अवरोहः । यत् । आह । इदम् ।

अहम् । अमुम् । भ्रातृव्यम् । आभ्यः । दिग्भ्य इति दिक् – भ्यः ।

अस्यै । दिवः । इति । इमान् । एव । लोकान् । भ्रातृव्यस्य ।

सम्ँविद्येति सं – विद्य । पुनः । इमम् । लोकम् ।

प्रत्यवरोहतीति प्रति – अवरोहति । समिति । **26 (50)**

**TS 1.7.6.3**

ज्योतिषा ऽभूवमित्याहास्मिन्नेव लोके प्रति तिष्ठत्यैन्द्रीमावृतमन्वावर्त इत्याहासौ वा आदित्य इन्द्रस्तस्यैवाऽऽवृतमनु पर्यावर्तते दक्षिणा पर्यावर्तते स्वमेव वीर्यमनु पर्यावर्तते तस्माद् दक्षिणो ऽर्द्ध आत्मनो वीर्यावत्तरो ऽथो आदित्यस्यैवाऽऽवृतमनु पर्यावर्तते समहं प्रजया सं मया प्रजेत्याहाऽऽशिषं – [ ] **27**

**TS 1.7.6.3 (Padam)**

ज्योतिषा । अभूवम् । इति । आह । अस्मिन्न् । एव । लोके । प्रतीति । तिष्ठति । ऐन्द्रीम् । आवृतमित्या – वृतम् । अन्वावर्त इत्यनु – आवर्ते । इति । आह । असौ । वै । आदित्यः । इन्द्रः । तस्य । एव । आवृतमित्या – वृतम् । अन्विति । पर्यावर्तत इति परि – आवर्तते । दक्षिणा । पर्यावर्तत इति परि – आवर्तते । स्वम् । एव । वीर्यम् । अन्विति । पर्यावर्तत इति परि – आवर्तते ।

तस्मात् । दक्षिणः । अर्द्धः । आत्मनः । वीर्यावत्तर इति

वीर्यावत् – तरः । अथो इति । आदित्यस्य । एव ।

आवृतमित्या – वृतम् । अन्विति । पर्यावर्तत इति परि – आवर्तते ।

समिति । अहम् । प्रजयेति प्र – जया । समिति । मया ।

प्रजेति प्र – जा । इति । आह । आशिषमित्या – शिषम् । **27 (50)**

**<u>TS 1.7.6.4</u>**

मेवैतामा शास्ते समिद्धो अग्ने मे दीदिहि समेद्धा ते अग्ने

दीद्यासमित्याह यथायजु–रेवैतद्–वसुमान्. यज्ञो वसीयान्–

भूयास–मित्याहाऽऽशिषमेवैतामा शास्ते बहु वै गार्.हपत्यस्यान्ते

मिश्रमिव चर्यत आग्निपावमानीभ्यां गार्.हपत्यमुप तिष्ठते पुनात्येवाग्निं

पुनीत आत्मानं द्वाभ्यां प्रतिष्ठित्या अग्ने गृहपत इत्याह – [ ] **28**

**<u>TS 1.7.6.4 (Padam)</u>**

एव । एताम् । एति । शास्ते । समिद्ध इति सं – इद्धः । अग्ने ।

मे । दीदिहि । समेद्धेति सं – एद्धा । ते । अग्ने । दीद्यासम् । इति ।

आह । यथायजुरिति यथा – यजुः । एव । एतत् ।

वसुमानिति वसु – मान् । यज्ञः । वसीयान् । भूयासम् । इति ।

आह । आशिषमित्या–शिषम् । एव । एताम् । एति । शास्ते । बहु । वै । गार्.हपत्यस्येति गार्.ह – पत्यस्य । अन्ते । मिश्रम् । इव । चर्यते । आग्निपावमानीभ्यामित्याग्नि – पावमानीभ्याम् । गार्.हपत्यमिति गार्.ह – पत्यम् । उपेति । तिष्ठते । पुनाति । एव । अग्निम् । पुनीते । आत्मानम् । द्वाभ्याम् । प्रतिष्ठित्या इति प्रति – स्थित्यै । अग्ने । गृहपत इति गृह – पते । इति । आह । **28 (50)**

**<u>TS 1.7.6.5</u>**

यथायजुरेवैतच्छतꣳ हिमा इत्याह शतं त्वा हेमन्तानिन्धिषीयेति वावैतदाह पुत्रस्य नाम गृह्णात्यन्नादमेवैनं करोति तामाशिषमा शासे तन्तवे ज्योतिष्मतीमिति ब्रूयाद्यस्य पुत्रो ऽजातः स्यात् तेजस्व्येवास्य ब्रह्मवर्चसी पुत्रो जायते तामाशिषमा शासे ऽमुष्मै ज्योतिष्मतीमिति ब्रूयाद्यस्य पुत्रो – [ ] **29**

**<u>TS 1.7.6.5 (Padam)</u>**

यथायजुरिति यथा – यजुः । एव । एतत् । शतम् । हिमाः । इति । आह । शतम् । त्वा । हेमन्तान् । इन्धिषीय । इति । वाव । एतत् ।

आह । पुत्रस्य । नाम । गृह्णाति । अन्नादमित्यन्न – अदम् । एव ।
एनम् । करोति । ताम् । आशिषमित्या – शिषम् । एति । शासे ।
तन्तवे । ज्योतिष्मतीम् । इति । ब्रूयात् । यस्य । पुत्रः । अजातः ।
स्यात् । तेजस्वी । एव । अस्य । ब्रह्मवर्चसीति ब्रह्म – वर्चसी ।
पुत्रः । जायते । ताम् । आशिषमित्या – शिषम् । एति । शासे ।
अमुष्मै । ज्योतिष्मतीम् । इति । ब्रूयात् । यस्य । पुत्रः । **29 (50)**

**<u>TS 1.7.6.6</u>**

जातः स्यात्तेज एवास्मिन् ब्रह्मवर्चसं दधाति यो वै यज्ञं प्रयुज्य न
विमुञ्चत्यप्रतिष्ठानो वै स भवति कस्त्वा युनक्ति स त्वा वि
मुञ्चत्वित्याह प्रजापतिर्वै कः प्रजापतिनैवैनं ँयुनक्ति प्रजापतिना
वि मुञ्चति प्रतिष्ठित्या ईश्वरं ँवै व्रतमविसृष्टं प्रदहो ऽग्ने व्रतपते
व्रतमचारिषमित्याह व्रतमेव – [ ] **30**

**<u>TS 1.7.6.6 (Padam)</u>**

जातः । स्यात् । तेजः । एव । अस्मिन्न् । ब्रह्मवर्चसमिति
ब्रह्म – वर्चसम् । दधाति । यः । वै । यज्ञम् । प्रयुज्येति प्र–युज्य ।
न । विमुञ्चतीति वि – मुञ्चति । अप्रतिष्ठान इत्यप्रति – स्थानः ।

वै । सः । भवति । कः । त्वा । युनक्ति । सः । त्वा । वीति ।
मुञ्चतु । इति । आह । प्रजापतिरिति प्रजा – पतिः । वै । कः ।
प्रजापतिनेति प्रजा – पतिना । एव । एनम् । युनक्ति । प्रजापतिनेति
प्रजा – पतिना । वीति । मुञ्चति । प्रतिष्ठित्या इति प्रति – स्थित्यै ।
ईश्वरम् । वै । व्रतम् । अविसृष्टमित्यवि – सृष्टम् ।
प्रदह इति प्र – दहः । अग्ने । व्रतपत इति व्रत – पते । व्रतम् ।
अचारिषम् । इति । आह । व्रतम् । एव । **30 (50)**

**TS 1.7.6.7**

वि सृजते शान्त्या अप्रदाहाय पराङ् वाव यज्ञ एति न नि वर्तते
पुनर्यो वै यज्ञस्य पुनरालंभं ँविद्वान्. यजते तमभि नि वर्तते यज्ञो
बभूव स आ बभूवेत्याहैष वै यज्ञस्य पुनरालंभ–स्तेनैवैनं पुनरा
लभते ऽनवरुद्धा वा एतस्य विराड् य आहिताग्निः सन्नसभः
पशवः खलु वै ( ) ब्राह्मणस्य सभेष्ट्वा प्राङुत्क्रम्य ब्रूयाद् गोमाꣳ
अग्ने ऽविमाꣳ अश्वी यज्ञ इत्यव सभाꣳ रुन्धे प्र सहस्रं
पशूनाप्नोत्या ऽस्य प्रजायां ँवाजी जायते ॥ **31**

**TS 1.7.6.7 (Padam)**

वीति । सृजते । शान्त्यै । अप्रदाहायेत्यप्र – दाहाय । पराङ् । वाव ।

यज्ञः । एति । न । नीति । वर्तते । पुनः । यः । वै । यज्ञस्य ।

पुनरालंभमिति पुनः – आलंभम् । विद्वान् । यजते । तम् ।

अभि । नीति । वर्तते । यज्ञः । बभूव । सः । एति । बभूव । इति ।

आह । एषः । वै । यज्ञस्य । पुनरालंभ इति पुनः–आलंभः । तेन ।

एव । एनम् । पुनः । एति । लभते । अनवरुद्धेत्यनव – रुद्धा । वै ।

एतस्य । विराडिति वि – राट् । यः । आहिताग्निरित्याहित–अग्निः ।

सन्न् । असभः । पशवः । खलु । वै ( ) । ब्राह्मणस्य । सभा ।

इष्ट्वा । प्राङ् । उत्क्रम्येत्युत् – क्रम्य । ब्रूयात् । गोमानिति

गो – मान् । अग्ने । अविमानित्यवि – मान् । अश्वी । यज्ञः ।

इति । अवेति । सभाम् । रुन्धे । प्रेति । सहस्रम् । पशून् ।

आप्नोति । एति । अस्य । प्रजायामिति प्र – जायाम् । वाजी ।

जायते ॥ **31 (74) (यः–स–मासिषं–गृहपत–इत्याहा–मुष्मै ज्योतिष्मती मिति ब्रूयाद्–यस्य पुत्रो–व्रतमेव–खलु–वै–चतुर्वि(ँ्)शतिश्च)** *(A6)*

**TS 1.7.7.1**

देव सवितः प्र सुव यज्ञं प्र सुव यज्ञपतिं भगाय दिव्यो गन्धर्वः ।

केतपूः केतं नः पुनातु वाचस्पति र्वाचमद्य स्वदाति नः ॥

इन्द्रस्य वज्रो ऽसि वार्त्रघ्नस्त्वया ऽयं वृत्रं वद्ध्यात् ॥

वाजस्य नु प्रसवे मातरं महीमदितिं नाम वचसा करामहे ।

यस्यामिदं विश्वं भुवन–माविवेश तस्यां नो देवः सविता

धर्म साविषत् ॥

अफ्स्व – [ ] **32**

**TS 1.7.7.1 (Padam)**

देव । सवितः । प्रेति । सुव । यज्ञम् । प्रेति । सुव । यज्ञपतिमिति

यज्ञ – पतिम् । भगाय । दिव्यः । गन्धर्वः ॥ केतपूरिति केत – पूः ।

केतम् । नः । पुनातु । वाचः । पतिः । वाचम् । अद्य । स्वदाति ।

नः ॥ इन्द्रस्य । वज्रः । असि । वार्त्रघ्न इति वार्त्र – घ्नः । त्वया ।

अयम् । वृत्रम् । वद्ध्यात् ॥ वाजस्य । नु । प्रसव इति प्र – सवे ।

मातरम् । महीम् । अदितिम् । नाम । वचसा । करामहे ॥ यस्याम् ।

इदम् । विश्वम् । भुवनम् । आविवेशेत्या – विवेश । तस्याम् । नः ।

देवः । सविता । धर्म । साविषत् ॥ अफ्स्वित्यप् – सु । **32 (50)**

**TS 1.7.7.2**

न्तरमृतमफ्सु भेषजमपामुत प्रशस्तिष्वश्वा भवथ वाजिनः ॥

वायुर्वा त्वा मनुर्वा त्वा गन्धर्वाः सप्तविꣳशतिः ।

ते अग्रे अश्वमायुञ्जन्ते अस्मिञ्जवमा ऽदधुः ॥

अपां नपादाशुहेमन्. य ऊर्मिः ककुद्मान् प्रतूर्ति र्वाजसातमस्तेनायं

वाँजꣳ सेत् ॥

विष्णोः क्रमो ऽसि विष्णोः क्रान्तमसि विष्णो र्विक्रान्तमस्यङ्कौ

न्यङ्का ( ) वभितो रथं यौँ ध्वान्तं वाँताग्रमनु सञ्चरन्तौ दूरेहेति–

रिन्द्रियावान् पतत्री ते नो ऽग्नयः पप्रयः पारयन्तु ॥ **33**

**TS 1.7.7.2 (Padam)**

अन्तः । अमृतम् । अफ्स्वित्यप् – सु । भेषजम् । अपाम् । उत ।

प्रशस्तिष्विति प्र – शस्तिषु । अश्वाः । भवथ । वाजिनः ॥ वायुः ।

वा । त्वा । मनुः । वा । त्वा । गन्धर्वाः । सप्तविꣳशतिरिति

सप्त – विꣳशतिः ॥ ते । अग्रे । अश्वम् । आयुञ्जन्न् । ते ।

अस्मिन्न् । जवम् । एति । अदधुः ॥ अपाम् । नपात् ।
आशुहेमन्नित्याशु – हेमन् । यः । ऊर्मिः । ककुद्मानिति
ककुत् – मान् । प्रतूर्तिरिति प्र – तूर्तिः । वाजसातम इति
वाज – सातमः । तेन । अयम् । वाजम् । सेत् ॥ विष्णोः । क्रमः ।
असि । विष्णोः । क्रान्तम् । असि । विष्णोः ।
विक्रान्तमिति वि – क्रान्तम् । असि । अङ्क्षौ ।
न्यङ्क्षाविति नि – अङ्क्षौ ( ) । अभितः । रथम् । यौ । ध्वान्तम् ।
वाताग्रमिति वात – अग्रम् । अन्विति । सञ्चरन्ताविति सं – चरन्तौ ।
दूरेहेतिरिति दूरे – हेतिः । इन्द्रियावानितीन्द्रिय – वान् । पतत्री ।
ते । नः । अग्नयः । पप्रयः । पारयन्तु ॥ **33 (65)**

**(अफ्सु–न्यङ्क्षौ–पञ्चदश च)** *(A7)*

**TS 1.7.8.1**

देवस्याह॒ँ सवितुः प्रसवे बृहस्पतिना वाजजिता वाजं जेषं
देवस्याह॒ँ सवितुः प्रसवे बृहस्पतिना वाजजिता वर्.षिष्ठं नाक॒ँ
रुहेयमिन्द्राय वाचं ँवदतेन्द्रं वाजं जापयतेन्द्रो वाजमजयित् ॥

अश्वाजनि वाजिनि वाजेषु वाजिनीवत्यश्वान् थ्समथ्सु वाजय ॥

अर्वा ऽसि सप्तिरसि वाज्यसि वाजिनो वाजं धावत मरुतां प्रसवे

जयत वियोजना मिमीद्ध्वमद्ध्वनः स्कभ्नीत – [ ] **34**

**TS 1.7.8.1 (Padam)**

देवस्य । अहम् । सवितुः । प्रसव इति प्र – सवे । बृहस्पतिना ।

वाजजितेति वाज – जिता । वाजम् । जेषम् । देवस्य । अहम् ।

सवितुः । प्रसव इति प्र – सवे । बृहस्पतिना ।

वाजजितेति वाज – जिता । वर्.षिष्ठम् । नाकम् । रुहेयम् । इन्द्राय ।

वाचम् । वदत । इन्द्रम् । वाजम् । जापयत । इन्द्रः । वाजम् ।

अजयित् ॥ अश्वाजनीत्यश्व – अजनि । वाजिनि । वाजेषु ।

वाजिनीवतीति वाजिनी – वति । अश्वान् । समथ्स्विति समत्–सु ।

वाजय ॥ अर्वा । असि । सप्तिः । असि । वाजी । असि ।

वाजिनः । वाजम् । धावत । मरुताम् । प्रसव इति प्र – सवे ।

जयत । वीति । योजना । मिमीद्ध्वम् । अद्ध्वनः ।

स्कभ्नीत । **34 (50)**

**TS 1.7.8.2**

काष्ठां गच्छत वाजेवाजे ऽवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः ॥

अस्य मद्ध्वः पिबत मादयद्ध्वं तृप्ता यात पथिभि र्देवयानैः ॥

ते नो अर्वन्तो हवनश्रुतो हवं ँविश्वे शृण्वन्तु वाजिनः ॥

मितद्रवः सहस्रसा मेधसाता सनिष्यवः ।

महो ये रत्न९ं समिथेषु जभ्रिरे शन्नो भवन्तु वाजिनो हवेषु ॥

देवताता मितद्रवः स्वर्काः ।

जंभयन्तो ऽहिं ँवृक९ं रक्षा९ंसि सनेम्यस्मद् युयव – [ ] **35**

**TS 1.7.8.2 (Padam)**

काष्ठाम् । गच्छत । वाजेवाज इति वाजे–वाजे । अवत । वाजिनः ।

नः । धनेषु । विप्राः । अमृताः । ऋतज्ञा इत्यृत – ज्ञाः ॥ अस्य ।

मद्ध्वः । पिबत । मादयद्ध्वम् । तृप्ताः । यात ।

पथिभिरिति पथि – भिः । देवयानैरिति देव – यानैः ॥ ते । नः ।

अर्वन्तः । हवनश्रुत इति हवन – श्रुतः । हवम् । विश्वे । शृण्वन्तु ।

वाजिनः ॥ मितद्रव इति मित – द्रवः । सहस्रसा इति सहस्र–साः ।

मेधसातेति मेध–साता । सनिष्यवः ॥ महः । ये । रत्नम् ।

समिथेष्विति सं – इथेषु । जभ्रिरे । शम् । नः । भवन्तु । वाजिनः ।
हवेषु ॥ देवतातेति देव – ताता । मितद्रव इति मित – द्रवः ।
स्वर्का इति सू – अर्काः ॥ जंभयन्तः । अहिम् । वृकम् ।
रक्षाꣳसि । सनेमि । अस्मत् । युयवन्न् । **35 (50)**

**TS 1.7.8.3**

न्नमीवाः ॥

एष स्य वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धो अपिकक्ष आसनि ।
क्रतुं दधिक्रा अनु सन्तवीत्वत् पथामङ्काꣳस्यन्वापनीफणत् ॥
उत स्मास्य द्रवत–स्तुरण्यतः पर्णं न वे–रनु वाति प्रगर्द्धिनः ।
श्येनस्येव ध्रजतो अङ्कसं परि दधिक्राव्.ण्णः सहोर्जा तरित्रतः ॥
आ मा वाजस्य प्रसवो जगम्यादा द्यावापृथिवी विश्वशंभू ।
आ मा गन्तां पितरा – [ ] **36**

**TS 1.7.8.3 (Padam)**

अमीवाः ॥ एषः । स्यः । वाजी । क्षिपणिम् । तुरण्यति । ग्रीवायाम् ।
बद्धः । अपिकक्ष इत्यपि – कक्षे । आसनि ॥ क्रतुम् । दधिक्रा इति
दधि – क्राः । अन्विति । सन्तवीत्वदिति सं – तवीत्वत् । पथाम् ।

अङ्गा॒ꣳसि । अन्विति । आ॒पनीफ॒णदित्या – पनीफणत् ॥ उ॒त । स्म॒ ।

अ॒स्य॒ । द्रवतः । तु॒र॒ण्य॒तः । प॒र्णम् । न । वेः । अन्विति । वा॒ति॒ ।

प्र॒ग॒र्द्धि॒न॒ इति प्र – ग॒र्द्धिनः ॥ श्ये॒नस्य । इ॒व॒ । ध्रजतः । अ॒ङ्क॒सम् ।

परीति । द॒धि॒क्राव्.ण्ण॒ इति दधि–क्राव्.ण्णः । स॒ह । ऊ॒र्जा । तरित्रतः ॥

एति । मा॒ । वाजस्य । प्र॒स॒व इति प्र – स॒वः । ज॒ग॒म्या॒त् । एति ।

द्यावापृथि॒वी इ॒ति द्यावा – पृ॒थि॒वी । वि॒श्वशं॒भू॒ इति वि॒श्व – शं॒भू॒ ॥

एति । मा॒ । ग॒न्ता॒म् । पि॒तरा । **36 (50)**

**<u>TS 1.7.8.4</u>**

मा॒त॒रा चाऽऽ मा॒ सोमो अमृत॒त्वाय गम्यात् ॥

वाजिनो वाजजितो॒ वाजꣳ स॒रिष्य॒न्तो॒ वाजं जे॒ष्य॒न्तो॒ बृह॒स्पते

र्भा॒गमव जिघ्र॒त वाजिनो वाजजितो॒ वाजꣳ ससृ॒वाꣳसो॒ वाजं

जि॒गि॒वाꣳसो॒ बृह॒स्पते॒र्भा॒गे नि मृढ्वमि॒यं ँव॒ः सा स॒त्या

स॒न्धा॒ ऽभूद् यामिन्द्रेण स॒मधद्ध्व॒मजीजिपत वनस्पत॒य इन्द्र॒ं ँवाज॒ं

ँविमुच्यद्ध्वं ॥ **37**

**TS 1.7.8.4 (Padam)**

मातरा । च । एति । मा । सोमः । अमृतत्वायेत्यमृत - त्वाय ।
गम्यात् ॥ वाजिनः । वाजजित इति वाज - जितः । वाजम् ।
सरिष्यन्तः । वाजम् । जेष्यन्तः । बृहस्पतेः । भागम् । अवेति ।
जिघ्रत । वाजिनः । वाजजित इति वाज - जितः । वाजम् ।
ससृवाꣳसः । वाजम् । जिगिवाꣳसः । बृहस्पतेः । भागे । नीति ।
मृढ्वम् । इयम् । वः । सा । सत्या । सन्धेति सं - धा । अभूत् ।
याम् । इन्द्रेण । समधद्ध्वमिति सं - अधद्ध्वम् । अजीजिपत ।
वनस्पतयः । इन्द्रम् । वाजम् । वीति । मुच्यद्ध्वम् ॥ **37 (42)**

**(स्कभ्नीत-युयवन्-पितरा-द्विचत्वारिꣳशच्च)** *(A8)*

**TS 1.7.9.1**

क्षत्रस्योल्बमसि क्षत्रस्य योनिरसि जाय एहि सुवो रोहाव रोहाव
हि सुवरहं नावुभयोः सुवो रोक्ष्यामि वाजश्च प्रसवश्चापिजश्च क्रतुश्च
सुवश्च मूर्द्धा च व्यश्ञियश्चाऽऽन्त्यायन श्चान्त्यश्च भौवनश्च
भुवनश्चाधिपतिश्च ।
आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतामपानो - [ ] **38**

**TS 1.7.9.1 (Padam)**

क्षत्रस्य । उल्बम् । असि । क्षत्रस्य । योनिः । असि । जाये । एति ।

इहि । सुवः । रोहाव । रोहाव । हि । सुवः । अहम् । नौ । उभयोः ।

सुवः । रोक्ष्यामि । वाजः । च । प्रसव इति प्र – सवः । च ।

अपिज इत्यपि– जः । च । क्रतुः । च । सुवः । च । मूर्द्धा । च ।

व्यश्ञिय इति वि – अश्ञियः । च । आन्त्यायनः । च । अन्त्यः ।

च । भौवनः । च । भुवनः । च । अधिपतिरित्यधि – पतिः । च ॥

आयुः । यज्ञेन । कल्पताम् । प्राण इति प्र – अनः । यज्ञेन ।

कल्पताम् । अपान इत्यप – अनः । **38 (50)**

**TS 1.7.9.2**

यज्ञेन कल्पतां ँव्यानो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पता७

श्रोत्रं ँयज्ञेन कल्पतां मनो यज्ञेन कल्पतां ँवाग्यज्ञेन कल्पता–मात्मा

यज्ञेन कल्पतां ँयज्ञो यज्ञेन कल्पता७ँ सुवर्देवा७ँ अगन्मामृता अभूम

प्रजापतेः प्रजा अभूमसमहं प्रजया सं मया प्रजा समह७ँ

रायस्पोषेण सं मया रायस्पोषो ऽन्नाय त्वा ऽन्नाद्याय त्वा वाजाय ( )

त्वा वाजजित्यायै त्वा ऽमृतमसि पुष्टिरसि प्रजननमसि ॥ **39**

**TS 1.7.9.2 (Padam)**

यज्ञेन । कल्पताम् । व्यान इति वि – अनः । यज्ञेन । कल्पताम् ।
चक्षुः । यज्ञेन । कल्पताम् । श्रोत्रम् । यज्ञेन । कल्पताम् । मनः ।
यज्ञेन । कल्पताम् । वाक् । यज्ञेन । कल्पताम् । आत्मा । यज्ञेन ।
कल्पताम् । यज्ञः । यज्ञेन । कल्पताम् । सुवः । देवान् । अगन्म ।
अमृताः । अभूम । प्रजापतेरिति प्रजा–पतेः । प्रजा इति प्र – जाः ।
अभूम । समिति । अहम् । प्रजयेति प्र – जया । समिति । मया ।
प्रजेति प्र–जा । समिति । अहम् । रायः । पोषेण । समिति । मया ।
रायः । पोषः । अन्नाय । त्वा । अन्नाद्यायेत्यन्न – अद्याय ।
त्वा । वाजाय ( ) । त्वा । वाजजित्याया इति वाज – जित्यायै ।
त्वा । अमृतम् । असि । पुष्टिः । असि ।
प्रजननमिति प्र – जननम् । असि ॥ **39 (59)**

**(अपानो–वाजाय–नव च)** *(A9)*

**TS 1.7.10.1**

वाजस्येमं प्रसवः सुषुवे अग्रे सोमꣳ राजानमोषधीष्वप्सु ।
ता अस्मभ्यं मधुमतीर्भवन्तु वयꣳ राष्ट्रे जाग्रियाम पुरोहिताः ॥

वाजस्येदं प्रसव आ बभूवेमा च विश्वा भुवनानि सर्वतः ।

स विराजं पर्येति प्रजानन् प्रजां पुष्टिं वर्द्धयमानो अस्मे ॥

वाजस्येमां प्रसवः शिश्रिये दिवमिमा च विश्वा भुवनानि सम्राट् ।

अदित्सन्तं दापयतु प्रजानन् रयिं – [ ] **40**

**TS 1.7.10.1 (Padam)**

वाजस्य । इमम् । प्रसव इति प्र – सवः । सुषुवे । अग्रे । सोमम् ।

राजानम् । ओषधीषु । अप्स्वित्यप् – सु ॥ ताः ।

अस्मभ्यमित्यस्म – भ्यम् । मधुमतीरिति मधु – मतीः । भवन्तु ।

वयम् । राष्ट्रे । जाग्रियाम । पुरोहिता इति पुरः – हिताः ॥ वाजस्य ।

इदम् । प्रसव इति प्र – सवः । एति । बभूव । इमा । च । विश्वा ।

भुवनानि । सर्वतः ॥ सः । विराजमिति वि – राजम् । परीति ।

एति । प्रजानन्निति प्र – जानन्न् । प्रजामिति प्र – जाम् । पुष्टिम् ।

वर्द्धयमानः । अस्मे इति ॥ वाजस्य । इमाम् ।

प्रसव इति प्र–सवः । शिश्रिये । दिवम् । इमा । च । विश्वा ।

भुवनानि । सम्राडिति सं – राट् ॥ अदित्सन्तम् । दापयतु ।
प्रजानन्निति प्र – जानन्न् । रयिम् । **40 (50)**

**TS 1.7.10.2**

च नः सर्ववीरां नि यच्छतु ॥
अग्ने **अच्छा** वदेह नः प्रति नः सुमना भव ।
प्र णो यच्छ भुवस्पते धनदा असि नस्त्वं ॥
प्र णो यच्छत्वर्यमा प्र भगः प्र बृहस्पतिः ।
प्र देवाः प्रोत सूनृता प्र वाग्देवी ददातु नः ॥
अर्यमणम् बृहस्पतिमिन्द्रं दानाय चोदय ।
वाचं ँविष्णुꣳ सरस्वतीꣳसवितारं – [ ] **41**

**TS 1.7.10.2 (Padam)**

च । नः । सर्ववीरामिति सर्व – वीराम् । नीति । यच्छतु ॥ अग्ने ।
अच्छ । वद । इह । नः । प्रतीति । नः । सुमना इति सु – मनाः ।
भव ॥ प्रेति । नः । यच्छ । भुवः । पते । धनदा इति धन – दाः ।
असि । नः । त्वम् ॥ प्रेति । नः । यच्छतु । अर्यमा । प्रेति । भगः ।
प्रेति । बृहस्पतिः ॥ प्रेति । देवाः । प्रेति । उत । सूनृता । प्रेति ।

वाक् । देवी । ददातु । नः ॥ अर्यमणम् । बृहस्पतिम् । इन्द्रम् । दानाय । चोदय ॥ वाचम् । विष्णुम् । सरस्वतीम् । सवितारम् । **41 (50)**

**TS 1.7.10.3**

च वाजिनं ॥

सोम॒ राजानं वरुणमग्नि–मन्वारभामहे ।

आदित्यान्. विष्णु॒ सूर्यं ब्रह्माणं च बृहस्पतिं ॥

देवस्य त्वा सवितुः प्रसवे ऽश्विनो र्बाहुभ्यां पूष्णो हस्ताभ्या॒

सरस्वत्यै वाचो यन्तु र्यन्त्रेणाग्नेस्त्वा साम्राज्येनाभि षिञ्चामीन्द्रस्य बृहस्पतेस्त्वा साम्राज्येनाभि षिञ्चामि ॥ **42**

**TS 1.7.10.3 (Padam)**

च । वाजिनम् ॥ सोमम् । राजानम् । वरुणम् । अग्निम् । अन्वारभामह इत्यनु – आरभामहे ॥ आदित्यान् । विष्णुम् । सूर्यम् । ब्रह्माणम् । च । बृहस्पतिम् ॥ देवस्य । त्वा । सवितुः । प्रसव इति प्र – सवे । अश्विनोः । बाहुभ्यामिति बाहु – भ्याम् । पूष्णः । हस्ताभ्याम् । सरस्वत्यै । वाचः । यन्तुः । यन्त्रेण । अग्नेः । त्वा ।

साम्राज्येनेति सां – राज्येन । अभीति । सिञ्चामि । इन्द्रस्य ।

बृहस्पतेः । त्वा । साम्राज्येनेति सां – राज्येन । अभीति ।

सिञ्चामि ॥ **42 (36)**

**(रयिं॒–सवितारं॒–षट्त्रिं॒शच्च)** *(A10)*

**TS 1.7.11.1**

अग्निरेकाक्षरेण वाचमुदजयदश्विनौ द्व्यक्षरेण प्राणापानावुदजयतां

विँष्णुस्त्र्यक्षरेण त्रीन् ँलोकानुदजयथ् सोमश्चतुरक्षरेण चतुष्पदः

पशूनुदजयत् पूषा पञ्चाक्षरेण पङ्क्तिमुदजयद् धाता षडक्षरेण

षड्–ऋतूनुदजयन् मरुतः सप्ताक्षरेण सप्तपदां॒ शक्वरीमुदजयन्

बृहस्पतिरष्टाक्षरेण गायत्रीमुदजयन् मित्रो नवाक्षरेण त्रिवृतं॒

स्तोममुदजयद् – [ ] **43**

**TS 1.7.11.1 (Padam)**

अग्निः । एकाक्षरेणेत्येक –अक्षरेण । वाचम् । उदिति ।

अजयत् । अश्विनौ । द्व्यक्षरेणेति द्वि – अक्षरेण ।

प्राणापानाविति प्राण– अपानौ । उदिति । अजयताम् । विष्णुः ।

त्र्यक्षरेणेति त्रि – अक्षरेण । त्रीन् । लोकान् । उदिति । अजयत् ।

सोमः । चतुरक्षरेणेति चतुः – अक्षरेण । चतुष्पद इति
चतुः – पदः । पशून् । उदिति । अजयत् । पूषा । पञ्चाक्षरेणेति
पञ्च – अक्षरेण । पङ्क्तिम् । उदिति । अजयत् । धाता ।
षडक्षरेणेति षट् – अक्षरेण । षट् । ऋतून् । उदिति । अजयत् ।
मरुतः । सप्ताक्षरेणेति सप्त – अक्षरेण । सप्तपदामिति
सप्त – पदाम् । शक्वरीम् । उदिति । अजयन्न् । बृहस्पतिः ।
अष्टाक्षरेणेत्यष्टा – अक्षरेण । गायत्रीम् । उदिति । अजयत् । मित्रः ।
नवाक्षरेणेति नव – अक्षरेण । त्रिवृतमिति त्रि – वृतम् । स्तोमम् ।
उदिति । अजयत् । **43 (50)**

**<u>TS 1.7.11.2</u>**

वरुणो दशाक्षरेण विराज–मुदजयदिन्द्र एकादशाक्षरेण
त्रिष्टुभ–मुदजयद् विश्वे देवा द्वादशाक्षरेण जगतीमुदजयन्
वसवस्त्रयोदशाक्षरेण त्रयोदश॰ स्तोममुदजयन् रुद्राश्चतुर्दशाक्षरेण
चतुर्दश॰ स्तोममुदजयन्नादित्याः पञ्चदशाक्षरेण पञ्चदश॰

स्तोममुदजयन्नदितिः षोडशाक्षरेण षोडश॑ स्तोममुदजयत्

प्रजापतिः सप्तदशाक्षरेण सप्तदश॑ स्तोममुदजयत् ॥ **44**

**TS 1.7.11.2 (Padam)**

वरुणः । दशाक्षरेणेति दश – अक्षरेण । विराजमिति वि – राजम् ।

उदिति । अजयत् । इन्द्रः । एकादशाक्षरेणेत्येकादश – अक्षरेण ।

त्रिष्टुभम् । उदिति । अजयत् । विश्वे । देवाः ।

द्वादशाक्षरेणेति द्वादश – अक्षरेण । जगतीम् । उदिति । अजयन्न् ।

वसवः । त्रयोदशाक्षरेणेति त्रयोदश – अक्षरेण । त्रयोदशमिति

त्रयः – दशम् । स्तोमम् । उदिति । अजयन्न् । रुद्राः ।

चतुर्दशाक्षरेणेति चतुर्दश – अक्षरेण । चतुर्दशमिति चतुः–दशम् ।

स्तोमम् । उदिति । अजयन्न् । आदित्याः । पञ्चदशाक्षरेणेति

पञ्चदश – अक्षरेण । पञ्चदशमिति पञ्च – दशम् । स्तोमम् ।

उदिति । अजयन्न् । अदितिः । षोडशाक्षरेणेति षोडश – अक्षरेण ।

षोडशम् । स्तोमम् । उदिति । अजयत् ।

प्रजापतिरिति प्रजा – पतिः । सप्तदशाक्षरेणेति सप्तदश–अक्षरेण ।

सप्तदशमिति सप्त – दशम् । स्तोमम् । उदिति । अजयत् ॥ **44 (46)**

**(त्रिवृत७ स्तोममुदजयथ्–षट्चत्वारिं॒शच्च)** *(A11)*

**TS 1.7.12.1**

उपयामगृहीतो ऽसि नृषदं त्वा द्रुषदं भुवनसदमिन्द्राय

जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वोपयामगृहीतो ऽस्यफ्सुषदं

त्वा घृतसदं ँव्योमसदमिन्द्राय जुष्टं गृह्णाम्येष ते

योनिरिन्द्राय त्वोपयामगृहीतो ऽसि पृथिविषदं त्वा ऽन्तरिक्षसदं

नाकसदमिन्द्राय जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा ॥

ये ग्रहाः पञ्चजनीना येषां तिस्रः परमजाः ।

दैव्यः कोशः – [ ] **45**

**TS 1.7.12.1 (Padam)**

उपयामगृहीत इत्युपयाम – गृहीतः । असि । नृषदमिति नृ–सदम् ।

त्वा । द्रुषदमिति द्रु – सदम् । भुवनसदमिति भुवन – सदम् ।

इन्द्राय । जुष्टम् । गृह्णामि । एषः । ते । योनिः । इन्द्राय । त्वा ।

उपयामगृहीत इत्युपयाम – गृहीतः । असि ।

अफ्सुषदमित्यफ्सु – सदम् । त्वा । घृतसदमिति घृत – सदम् ।

व्योमसदमिति व्योम – सदम् । इन्द्राय । जुष्टम् । गृह्णामि । एषः ।
ते । योनिः । इन्द्राय । त्वा । उपयामगृहीत इत्युपयाम – गृहीतः ।
असि । पृथिविषदमिति पृथिवि – सदम् । त्वा ।
अन्तरिक्षसदमित्यन्तरिक्ष – सदम् । नाकसदमिति नाक – सदम् ।
इन्द्राय । जुष्टम् । गृह्णामि । एषः । ते । योनिः । इन्द्राय । त्वा ॥ ये ।
ग्रहाः । पञ्चजनीना इति पञ्च – जनीनाः । येषाम् । तिस्रः ।
परमजा इति परम – जाः ॥ दैव्यः । कोशः । **45 (50)**

**TS 1.7.12.2**

समुब्जितः ।

तेषां ँ विशिप्रियाणा–मिषमूर्ज७ं समग्रभीमेष ते योनिरिन्द्राय त्वा ॥
अपा७ं रसमुद्वयस७ं सूर्यरश्मि७ं समाभृतं ।
अपा७ं रसस्य यो रसस्तं ँ वो गृह्णाम्युत्तममेष ते योनिरिन्द्राय त्वा ॥
अया विष्ठा जनयन् कर्वराणि स हि घृणिरुरुर्वराय गातुः ।
स प्रत्युदैद् धरुणो मद्ध्वो अग्र७ स्वायां ँ यत् तनुवां ( ) तनूमैरयत ।

उपयामगृहीतो ऽसि प्रजापतये त्वा जुष्टं गृह्णाम्येष ते योनिः
प्रजापतये त्वा ॥ **46**

**TS 1.7.12.2 (Padam)**

समुब्जित इति सं – उब्जितः ॥ तेषाम् । विशिप्रियाणामिति
वि – शिप्रियाणाम् । इषम् । ऊर्जम् । समिति । अग्रभीम् । एषः ।
ते । योनिः । इन्द्राय । त्वा ॥ अपाम् । रसम् ।
उद्वयसमित्युत् – वयसम् । सूर्यरश्मिमिति सूर्य – रश्मिम् ।
समाभृतमिति सं – आभृतम् ॥ अपाम् । रसस्य । यः । रसः ।
तम् । वः । गृह्णामि । उत्तममित्युत् – तमम् । एषः । ते । योनिः ।
इन्द्राय । त्वा ॥ अया । विष्ठा इति वि–स्थाः । जनयन्न् । कर्वराणि ।
सः । हि । घृणिः । उरुः । वराय । गातुः ॥ सः । प्रति । उदिति ।
ऐत् । धरुणः । मद्ध्वः । अग्रम् । स्वायाम् । यत् । तनुवां ( ) ।
तनूम् । ऐरयत ॥ उपयामगृहीत इत्युपयाम – गृहीतः । असि ।
प्रजापतय इति प्रजा – पतये । त्वा । जुष्टम् । गृह्णामि । एषः । ते ।

योनिः । प्रजापतय इति प्रजा – पतये । त्वा ॥ **46 (63)**

**(कोश–स्तनुवां–त्रयोदश च)***(A12)*

**TS 1.7.13.1**

अन्वह मासा अन्विद्–वनान्यन्वोषधीरनु पर्वतासः ।

अन्विन्द्र७ं रोदसी वावशाने अन्वापो अजिहत जायमानं ॥

अनु ते दायि मह इन्द्रियाय सत्रा ते विश्वमनु वृत्रहत्ये ।

अनु क्षत्रमनु सहो यजत्रेन्द्र देवेभिरनु ते नृषह्ये ॥

इन्द्राणीमासु नारिषु सुपत्नी–महमश्रवं ।

न ह्यस्या अपरं चन जरसा – [ ] **47**

**TS 1.7.13.1 (Padam)**

अन्विति । अह । मासाः । अन्विति । इत् । वनानि । अन्विति ।

ओषधीः । अन्विति । पर्वतासः ॥ अन्विति । इन्द्रम् । रोदसी इति ।

वावशाने इति । अन्विति । आपः । अजिहत । जायमानम् ॥

अन्विति । ते । दायि । महे । इन्द्रियाय । सत्रा । ते । विश्वम् । अन्विति ।

वृत्रहत्य इति वृत्र – हत्ये ॥ अन्विति । क्षत्रम् । अन्विति । सहः ।

यजत्र । इन्द्र । देवेभिः । अन्विति । ते । नृषह्य इति

नृ – सह्ये ॥ इन्द्राणीम् । आसु । नारिषु । सुपत्नीमिति सु–पत्नीम् ।

अहम् । अश्रवम् ॥ न । हि । अस्याः । अपरम् ।

चन । जरसा । **47 (50)**

**TS 1.7.13.2**

मरते पतिः ॥

नाहमिन्द्राणि रारण सख्युर्वृषाकपेर्. ऋते ।

यस्येदमप्यꣳ हविः प्रियं देवेषु गच्छति ॥

यो जात एव प्रथमो मनस्वान् देवो देवान् क्रतुना पर्यभूषत् ।

यस्य शुष्माद्–रोदसी अभ्यसेतां नृम्णस्य मह्ना स जनास इन्द्रः ॥

आ ते मह इन्द्रोत्युग्र समन्यवो यथ् समरन्त सेनाः ।

पताति दिद्युन्नर्यस्य बाहुवोर्मा ते – [ ] **48**

**TS 1.7.13.2 (Padam)**

मरते । पतिः ॥ न । अहम् । इन्द्राणि । रारण । सख्युः ।

वृषाकपेरिति वृषा – कपेः । ऋते ॥ यस्य । इदम् । अप्यम् । हविः ।

प्रियम् । देवेषु । गच्छति ॥ यः । जातः । एव । प्रथमः । मनस्वान् ।

देवः । देवान् । क्रतुना । पर्यभूषदिति परि – अभूषत् ॥

यस्य । शुष्मात् । रोदसी इति । अभ्यसेताम् । नृंणस्य । मह्ना । सः ।

जनासः । इन्द्रः ॥ एति । ते । महः । इन्द्र । ऊती । उग्र ।

समन्यव इति स – मन्यवः । यत् । समरन्तेति सं – अरन्त । सेनाः ॥

पताति । दिद्युत् । नर्यस्य । बाहुवोः । मा । ते । **48 (50)**

**TS 1.7.13.3**

मनो विष्वद्रियग् वि चारीत् ॥

मा नो मर्द्धीरा भरा दद्धि तन्नः प्र दाशुषे दातवे भूरि यत् ते ।

नव्ये देष्णे शस्ते अस्मिन् त उक्थे प्र ब्रवाम वयमिन्द्र स्तुवन्तः ॥

आ तू भर माकिरेतत् परि ष्ठाद्–विद्मा हि त्वा वसुपतिँ वसूनां ।

इन्द्र यत् ते माहिनं दत्र–मस्त्यस्मभ्यं तद्धर्यश्व – [ ] **49**

**TS 1.7.13.3 (Padam)**

मनः । विष्वद्रियगिति विष्व – द्रियक् । वीति । चारीत् ॥ मा । नः ।

मर्द्धीः । एति । भर । दद्धि । तत् । नः । प्रेति । दाशुषे । दातवे । भूरि ।

यत् । ते ॥ नव्ये । देष्णे । शस्ते । अस्मिन्न् । ते । उक्थे । प्रेति ।

ब्रवाम । वयम् । इन्द्र । स्तुवन्तः ॥ एति । तु । भर । माकिः । एतत् ।

परीति । स्थात् । विद्म । हि । त्वा ।

वसुपतिमिति वसु – पतिम् । वसूनाम् ॥ इन्द्र । यत् । ते ।

माहिनम् । दत्रम् । अस्ति । अस्मभ्यमित्यस्म – भ्यम् । तत् ।

हर्यश्वेति हरि – अश्व । **49 (50)**

**<u>TS 1.7.13.4</u>**

प्र यन्धि ॥

प्रदातारꣳ हवामह इन्द्रमा हविषा वयं ।

उभा हि हस्ता वसुना पृणस्वाऽऽ प्र यच्छ दक्षिणादोत सव्यात् ॥

प्रदाता वज्री वृषभस्तुराषाट्छुष्मी राजा वृत्रहा सोमपावा ।

अस्मिन्. यज्ञे बर्.हिष्या निषद्याथा भव यजमानाय शं ँयोः ॥

इन्द्रः सुत्रामा स्ववाꣳ अवोभिः सुमृडीको भवतु विश्ववेदाः ।

बाधतां द्वेषो अभयं कृणोतु सुवीर्यस्य – [ ] **50**

**<u>TS 1.7.13.4 (Padam)</u>**

प्रेति । यन्धि ॥ प्रदातारमिति प्र – दातारम् । हवामहे । इन्द्रम् ।

एति । हविषा । वयम् ॥ उभा । हि । हस्ता । वसुना । पृणस्व ।

आ । प्रेति । यच्छ । दक्षिणात् । एति । उत । सव्यात् ॥

प्रदातेति प्र – दाता । वज्री । वृषभः । तुराषाट् । शुष्मी । राजा ।

वृत्रहेति वृत्र – हा । सोमपावेति सोम – पावा ॥ अस्मिन्न् । यज्ञे ।

बर्.हिषि । एति । निषद्येति नि – सद्य । अथ । भव । यजमानाय ।

शम् । योः ॥ इन्द्रः । सुत्रामेति सु – त्रामा । स्ववानिति स्व–वान् ।

अवोभिरित्यवः – भिः । सुमृडीक इति सु – मृडीकः । भवतु ।

विश्ववेदा इति विश्व–वेदाः ॥ बाधताम् । द्वेषः । अभयम् । कृणोतु ।

सुवीर्यस्येति सु – वीर्यस्य । **50 (50)**

**TS 1.7.13.5**

पतयः स्याम ॥

तस्य वय७ँ सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम ।

स सुत्रामा स्ववा७ँ इन्द्रो अस्मे आराच्चिद्द्वेषः सनुतर्युयोतु ॥

रेवतीर्नः सधमाद इन्द्रे सन्तु तुविवाजाः ।

क्षुमन्तो याभिर्मदेम ॥

प्रो ष्वस्मै पुरोरथमिन्द्राय शूषमर्चत ।

अभीके चिदु लोककृथ् सङ्गे समथ्सु वृत्रहा ।

अस्माकं बोधि चोदिता नभन्ता–मन्यकेषां ।

ज्याका अधि ( ) धन्वसु ॥ **51**

**TS 1.7.13.5 (Padam)**

पतयः । स्याम ॥ तस्य । वयम् । सुमताविति सु–मतौ । यज्ञियस्य ।

अपीति । भद्रे । सौमनसे । स्याम ॥ सः । सुत्रामेति सु – त्रामा ।

स्ववानिति स्व–वान् । इन्द्रः । अस्मे इति । आरात् । चित् । द्वेषः ।

सनुतः । युयोतु ॥ रेवतीः । नः । सधमाद इति सध – मादः ।

इन्द्रे । सन्तु । तुविवाजा इति तुवि – वाजाः ॥ क्षुमन्तः । याभिः ।

मदेम ॥ प्रो इति । स्विति । अस्मै । पुरोरथमिति पुरः – रथम् ।

इन्द्राय । शूषम् । अर्चत ॥ अभीके । चित् । उ ।

लोककृदिति लोक – कृत् । सङ्गे । समत्स्विति समत् – सु ।

वृत्रहेति वृत्र – हा ॥ अस्माकम् । बोधि । चोदिता । नभन्ताम् ।

अन्यकेषाम् ॥ ज्याकाः । अधीति ( ) ।

धन्वस्विति धन्व – सु ॥ **51 (51)**

**(जरसा–मा ते–हर्यश्व–सुवीर्यस्या– द्ध्ये–कं च )** *(A13)*

========================

**Prasna Korvai with starting Padams of 1 to 13 Anuvaakams :-**

(पाकयज्ञ॒ऀ-स॒श्रवाः-परो॒क्षं-ब॒र्.हिषो॒ऽहं-ध्रु॒वा-मग॒न्मेत्या॒ह - दे॒व सवित-र्दे॒वस्या॒हं-क्ष॒त्रस्योल्ब॒ं-वाजस्ये॒म-म॒ग्निरेकाक्षरेणो-पया॒मगृहीतो॒ऽ-स्यन्व॒ह मासा॒-स्त्रयोदश)

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-**

(पा॒कय॒ज्ञं-प॒रोक्षं-ध्रु॒वां-विं सृजते-च न॒ः सर्ववीरा॒ं - पतयः स्यो॒-मैकपञ्चा॒शत् )

**First and Last Padam of Seventh Prasnam :-**

(पा॒कय॒ज्ञं-धन्वसु ।)

॥ हरिः ओं ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहिता पद पाठे प्रथमकाण्डे सप्तमः प्रश्नः समाप्तः ॥

**Details of Panchati and Padam for Kandam 1 , Prasanam 7 – (TS 1.7)**

| | Panchati | Padams |
|---|---|---|
| Anuvakam 1 | 6 | 319 |
| Anuvakam 2 | 4 | 220 |
| Anuvakam 3 | 4 | 215 |
| Anuvakam 4 | 6 | 308 |
| Anuvakam 5 | 4 | 207 |
| Anuvakam 6 | 7 | 374 |
| Anuvakam 7 | 2 | 115 |
| Anuvakam 8 | 4 | 192 |
| Anuvakam 9 | 2 | 109 |
| Anuvakam 10 | 3 | 136 |
| Anuvakam 11 | 2 | 96 |
| Anuvakam 12 | 2 | 113 |
| Anuvakam 13 | 5 | 251 |
| Total → | 51 | 2655 |

**Notes:**

- **Please refer to the book “TS Kandam 1” and “TS 1.1 pada paadam with Vaakyam” for notes and conventions used in this Compilation.**
- **Please download our vedic compilations from our web site “www.vedavms.in”**